॥ श्रीः ॥

## ॥ श्रीकमलजदयिताष्टकम् ॥

शृङ्गक्ष्माभृन्निवासे शुकमुखमुनिभिः सेव्यमानाङ्घ्रिपद्मे
स्वाङ्गच्छायाविधूतामृतकरसुरराड्वाहने वाक्सवित्रि ।
शम्भुश्रीनाथमुख्यामरवरनिकरैर्मोदतः पूज्यमाने
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ १

कल्यादौ पार्वतीशः प्रवरसुरगणप्रार्थितः श्रौतवर्त्म-
प्राबल्यं नेतुकामो यतिवरवपुषागत्य यां शृङ्गशैले ।
संस्थाप्यार्चां प्रचक्रे बहुविधनुतिभिः सा त्वमिन्द्वर्धचूडा
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ २

पापौघं ध्वंसयित्वा बहुजनिरचितं किं च पुण्यालिमारात्
सम्पाद्यास्तिक्यबुद्धिं श्रुतिगुरुवचनेष्वादरं भक्तिदार्ढ्यम् ।
देवाचार्यद्विजातिष्वपि मनुनिवहे तावकीने नितान्तं
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ ३

विद्यामुद्राक्षमालामृतघटविलसत्पाणिपाथोजजाले
विद्यादानप्रवीणे जडबधिरमुखेभ्योऽपि शीघ्रं नतेभ्यः ।
कामादीनान्तरान्मत्सहजरिपुवरान् देवि निर्मूल्य वेगात्
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ ४

कर्मस्वात्मोचितेषु स्थिरतरधिषणां देहदार्ढ्यं तदर्थं
दीर्घं चायुर्यशश्च त्रिभुवनविदितं पापमार्गाद्विरक्तिम् ।
सत्सङ्गं सत्कथायाः श्रवणमपि सदा देवि दत्वा कृपाब्धे
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ ५

मातस्त्वत्पादपद्मं न विविधकुसुमैः पूजितं जातु भक्त्या
गातुं नैवाहमीशे जडमतिरलसस्त्वद्गुणान् दिव्यपद्यैः ।
मूके सेवाविहीनेऽप्यनुपमकरुणामर्भकेऽम्बेव कृत्वा
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ।। ६

शान्त्याद्याः सम्पदो मे वितर शुभकरीर्नित्यतद्भिन्नबोधं
वैराग्यं मोक्षवाञ्छामपि लघु कलय श्रीशिवासेव्यमाने ।
विद्यातीर्थादियोगिप्रवरकरसरोजातसम्पूजिताङ्घ्रे
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ।। ७

सच्चिद्रूपात्मनो मे श्रुतिमनननिदिध्यासनान्याशु मातः
सम्पाद्य स्वान्तमेतद्रुचियुतमनिशं निर्विकल्पे समाधौ ।
तुङ्गातीराङ्कराजद्वरगृहविलसच्चक्रराजासनस्थे
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ।। ८

इति श्री शृङ्गेरीजगद्गुरुसच्चिदानन्दशिवाभिनव
नृसिम्हभारतीमहास्वामिभिः रचितं श्रीकमलजदयिताष्टकं सम्पूर्णम् ।।

